## श्रीग्रामण्योश्छन्दसि । (५६/३५७३)

श्री ग्रामणी इत्येतयोः छन्दसि विषये आमो नुडागमो भवति । 'श्रीणामुदारो [1]धरुणो रयीणाम्' (ऋ.१०.४५.५) । '[2]अपि तत्र सूतग्रामणीनाम्' (काठ. २८. ३) । श्रीशब्दस्य 'वामि' (१. ४. ५/३०४) इति विकल्पेन नदीसञ्ज्ञा, [3]तत्र नित्यार्थं वचनम् । सूतग्रामणीनाम् इति यदा सूताश्च ते ग्रामण्यश्च सूतग्रामण्यो भवन्ति तदर्थमिदं वचनम् । यदा तु सूतश्च ग्रामणीश्च सूतग्रामणि, सूतग्रामणि च सूतग्रामणि च सूतग्रामणि च इति [4]सूतग्रामणीनाम् इति, तदा ह्रस्वात् (७. १. ५४/२०८) इत्येव सिद्धम्[5] ॥

## गोः पादान्ते । (५७/३५७४)

गो इत्येतस्मात्[6] ऋक्पादान्ते वर्तमानादुत्तरस्य आमः नुडागमो भवति । 'विद्मा हि त्वा [7]गोपतिं शूर गोनाम्' (ऋ. १०. ४७. २) । पादान्ते इति किम् ? 'गवां गोत्रमुदसृजो यदङ्गिरः' (ऋ. २. २३. १८) । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु. प. ३५) इति पादान्तेऽपि क्वचिन्न भवति । 'हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम्' (ऋ. १०. १६६. १) ॥

## इदितो नुम् धातोः । (५८/२२६२)

इदितो धातोर्नुमागमो भवति । [8]कुडि – कुण्डिता । कुण्डितुम् । [9]कुण्डितव्यम् । [10]कुण्डा । हुडि – हुण्डिता । हुण्डितुम् । [11]हुण्डितव्यम् । [12]हुण्डा । इदितः इति किम् ? पचति । [13]पठति । अयं धातूपदेशावस्थायामेव नुगाममो भवति कुण्डा, हुण्डा इति, 'गुरोश्च हलः' (३. ३. १०३/३२८०) [14]इत्यकारप्रत्ययो यथा स्यात् । तथा हि 'धिन्विकृण्व्योर च' (३. १. ८०/२३३२) इति प्रत्ययविधावेव नुमनुषक्तयोर्ग्रहणम् । धातुग्रहणं चेह क्रियते [15]धातूपदेशकाल एव नुमागमो यथा स्यात् इत्येवमर्थम् । तासिसिचोरिदित्कार्यं नास्ति इत्युच्चारणार्थो [16]निरनुनासिक इकारः पठ्यते । अमंस्त इत्येवमादौ हि 'हनः सिच्' (१.२.२४/२६९७) इति कित्वविधानसामर्थ्यात् नकारलोपो न भवति । मन्ता इत्यत्रापि 'असिद्धवदत्राभात्' (६. ४. २२/२१८३) इति टिलोपस्यासिद्धत्वान्नलोपो न भवति । इह कस्मान्न भवति, भेत्ता, छेत्ता इति ? 'इरितां समुदायस्येत्सञ्ज्ञा' (७. २. ४/२२६८ वा.) इति इदित्वं नास्ति । अवयवशोऽपि इत्सञ्ज्ञायां सत्यां 'गोः पादान्ते' (७. १. ५७/३५७४) इतोऽन्तग्रहणमनुवर्तयितव्यम्, तेनान्तेदितो धातवो गृह्यन्ते ॥

## शे मुचादीनाम् । (५९/२५४२)

शे [17]प्रत्यये परतो मुचादीनम्[18] नुमागमो भवति । मुच्लृ – मुञ्चति । लुप्लृ – लुम्पति । विद्लृ –विन्दति । लिपि – लिम्पति । [19]सिच् – सिञ्चति । कृती – [20]कृन्तति । खिद – खिन्दति । पिश – पिंशति ।

---

1. धरुणो नास्ति क. 2. अन्यत्रापि क. 3. तत्र नास्ति क. 4. बहूनाम् सूतग्रामणिशब्दानाम् एकशेषः क्रियते तदा इत्यधिकम् क 5. इति इत्यधिकम् क, तस्मान्नारम्भणीयम् इत्यधिकम् ई. 6. उत्तरस्य इत्यधिकम् क. 7. सत्पतिं मुद्रितः पाठः 8. कुण्डी इ. 9–12. नास्ति ई. 13. पठति नास्ति इ. 14. इत्यकारो ई. 15. सञ्ज्ञाप्रवृत्तिकाले क. इ. ई. ह. 16. अननुनासिकः ह. 17. प्रत्यये नास्ति क. 18. अङ्गानाम् इत्यधिकम् ब. क. इ. ह. 19. सिच्लृ क. 20. निकृन्तति ब.